# ॥ श्रीमीनाक्षी स्तुतिः ॥

श्रीमत्परमहंसेत्यादि समस्तबिरुदालङ्कृत श्रीजगद्गुरु सार्वभौम शृङ्गगिरि श्री श्री चन्द्रशेखरभारती महास्वामिभिः अनुगृहीता ।

अद्राक्षं बहुभाग्यतो गुरुवरैः संपूज्यमानां मुदा
फुल्लन्मल्लिमुखप्रसूननिवहैर्हालास्यनाथप्रियाम् ।
वीणावेणुमृदङ्गनादमुदितां एणाङ्कबिम्बाननाम्
काणादादिसमस्तशास्त्रमतिदां शोणाधरां श्यामलाम् ॥

मातङ्गकुम्भविजयिस्तनभारभुग्न
मध्यां मदारुणविलोचनवश्यकान्ताम् ।
ताम्राधरस्फुरितहासविधूत तार
राजप्रवालसुषमां भज मीननेत्राम् ॥

आपादमस्तकदयारसपूरपूर्णाम्
शापायुधोत्तमसमर्चितपादपद्माम् ।
चापायितेक्षुममलीमसचित्तताये
नीपाटवीविहरणां भज मीननेत्राम् ॥

कन्दर्पवैर्यपि यया सविलासहास
नेत्रावलोकनवशीकृतमानसोऽभूत्।
तां सर्वदा सकलमोहनरूपवेषाम्
मोहान्धकारहरणां भज मीननेत्राम्॥

अद्यापि यत्पुरगतः सकलोऽपि जन्तुः
क्षुत्तृड्व्यथाविरहितः प्रसुवेव बालः।
संपोष्यते करुणया भजकार्तिहन्त्रीम्
भक्त्याऽन्वहं हृदय तां भज मीननेत्राम्॥

हालास्यनाथदयिते करुणापयोधे
बालं विलोलमनसं करुणैकपात्रम्।
वीक्षस्व मां लघुदयोर्मिलदृष्टिपातैः
मातर्न मेऽस्ति भुवने गतिरन्तरा त्वाम्॥

श्रुत्युक्तकर्मनिवहाकरणाद्विशुद्धिः
चित्तस्य नास्ति मम चञ्चलता निवृत्त्यै
कुर्यां किमम्ब मनसा सकलाघशान्त्यै

मातस्त्वदंघ्रिभजनं सततं दयस्व ॥

त्वद्रूपदेशिकवरैः सततं विभाव्यम्
चिद्रूपमादिनिधनान्तरहीनमम्ब ।
भद्रावहं प्रणमतां सकलाघहन्तृ
त्वद्रूपमेव मम हृत्कमले विभातु ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]